# वैयाकरणसिद्धान्तकौमुदी

## हलन्तपुंलिङ्गप्रकरणम् (९)

## १३.०९.२०११

- नकारान्तः पुंलिङ्गः ‘मघवन्’ शब्दः
- औणादिकः शब्दः । ’श्वन्-उक्षन्-पूषन्.......मघवन्’ इति उणादिसूत्रेण निपातितः ।

# ३६०. मघवा बहुलम् (६.४.१२८)

- पदद्वयम् । मघवा, बहुलम् ।
- ‘अर्वणस्त्रसावनञः’ (६.४.१२७) इति सूत्रात् ‘तृ’ इति अनुवर्तते ।
- मघवन्-शब्दस्य वा तृ इति अन्तादेशः स्यात् ।
- ऋ इत् ।
- ‘अलोऽन्त्यस्य’ इति अन्तादेशः ।

- मघवन्
- मघवत्
- अस्य शब्दस्य तकारान्तस्य एकं रूपम्, नकारान्तस्य च अपरम्, सर्वासु विभक्तिषु ।

- तृ-आदेशपक्षे,
- मघवन्
- मघव त् (‘मघवा बहुलम्’ इति त्रादेशः)
- मघवत्  (सुँ) स्

# ३६१. उगिदचां सर्वनामस्थानेऽधातोः (७.१.७०)

- पदत्रयम् । उगित्-अचाम्, सर्वनामस्थाने, अधातोः ।
- 'इदितो नुम् धातोः' (७.१.५८) इत्यतः 'नुम्' इति अनुवर्तते ।
- अधातोः उगितः नलोपिनः अञ्चतेश्च नुमागमः स्यात् सर्वनामस्थाने परे ।
- 'तृ' आदेशः उगित् [उक् = उ, ऋ, ऌ इत् यस्य सः उगित्) ।
- मित्त्वाद् अन्त्यादचः परः नुमागमः ।
- उपधादीर्घः, मघवान्

- मघवत् स्
- मघव न् त् स् ('उगिदचां...' इति नुम्)
- मघवन्  त्     ('हल्ङ्याब्भ्यो ...' - ६.१.६८ - इति सुलोपः)
- मघवन्       ('संयोगान्तस्य लोपः' - ८.२.२३)
- मघवान्       ('सर्वनामस्थाने चासम्बुद्धौ' - ६.४.८)

- इह दीर्घे कर्तव्ये संयोगान्तलोपस्य असिद्धत्वं न भवति, बहुलग्रहणात् ।
- क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव ।



शिष्टप्रयोगाननुसृत्य लोके विज्ञेयमेतदबहुलग्रहे तु ॥

- तथा च 'श्वन्नुक्षन्...' इति निपातनात् मघशब्दात् मतुपा च भाषायामपि शब्दद्वयसिद्धिम् आश्रित्य एतत् सूत्रं प्रत्याख्यातम् आकरे ।
- अर्थात्, उणादिसूत्रेण नकारान्तः 'मघवन्' शब्दः सिध्यति ।
- धनवाचिनः मघशब्दात् मघः = धनम् अस्य अस्तीत्यर्थे मतुप्-प्रत्यये कृते तकारान्तः मघवत्-शब्दः सिध्यति ।
- अतः अनेन सूत्रेण नकारान्तस्य त्रादेशं विधाय रूपद्वयं न साधनीयम् इति भावः ।
- 'हविर्जक्षिति निःशङ्को मखेषु मघवानसौ' इति भट्टिः ।

- मघवन्
- मघवत्  ('मघवा बहुलम्' - ६.४.१२८ - इति तृ-आदेशः)
- मघवत्  औ
- मघव न् त् औ  ('उगिदचां सर्वनामस्थानेऽधातोः' - ७.१.७० - इति नुम्)
- मघवं तौ  ('नश्चापदान्तस्य झलि' - ८.३.२४ - इति अनुस्वारः)
- **मघवन्तौ**  ('अनुस्वारस्य ययि परसवर्णः' - ८.४.५८)

- **मघवन्तः ।**

- हे मघवन्
- सम्बुद्धौ उपधादीर्घो न । ['सर्वनामस्थाने च असम्बुद्धौ']
- मघवन्तम्, मघवन्तौ, मघवतः ।
- मघवता, मघवद्भ्याम् इत्यादि ।

# नकारान्तः पुंलिङ्गः मघवन्-शब्दः (त…पक्षे)

सौ नुमागमे कृते सुलोपे संयोगान्तलोपे बहुलग्रहणात् तस्य असिद्धत्वे बाधिते उपधादीर्घः

सर्वनामस्थाने परे 'उगिदचां सर्वनामस्थाने चाधातोः' इति नुमागमः

| | एकवचनम् | | बहुवचनम् |
|---|---|---|---|
| | मघवान् | मघवन्तौ | मघवन्तः |
| …क्तिः | हे मघवन् | हे मघवन्तौ | हे मघवन्तः |
| द्वितीयाविभक्तिः | मघवन्तम् | मघवन्तौ | मघवतः |
| | मघवता | मघवद्भ्याम् | मघवद्भिः |
| | मघवते | मघवद्भ्याम् | मघवद्भ्यः |
| | मघवतः | मघवद्भ्याम् | मघवद्भ्यः |
| | मघवतः | मघवतोः | मघवताम् |
| सप्तमीविभक्तिः | मघवति | मघवतोः | मघवत्सु |

शस्प्रभृतिषु अजादिषु किमपि कार्यं न

शस्प्रभृतिषु हलादिषु जश्त्वम् । सुपि जश्त्वचर्त्वे ।

- तृत्वाभावे मघवा
- मघवन् (सुँ) स्
- मघवान्  स्  (‘सर्वनामस्थाने चासम्बुद्धौ’ - ६.४.८ - इति उपधादीर्घः)
- मघवान्  (‘हल्ङ्याब्भ्यः..’ - ६.१.६८ - इति सुलोपः)
- मघवा  (‘नलोपः प्रातिपदिकान्तस्य’ - ८.२.७)

- ‘छन्दसीवनिपौ च’ इति वनिबन्तं मध्योदात्तं छन्दस्येव । अन्तोदात्तं तु लोकेऽपीति विशेषः ।

- मघवानौ, मघवानः ।
- सुटि राजवत् ।

- मघवन्  (शस्) अस्

# ३६२. श्वयुवमघोनामतद्धिते (६.४.१३३)

- पदद्वयम् । श्व-युव-मघोनाम्, अतद्धिते ।
- 'भस्य' (६.४.१२९) इति अधिक्रियते । 'वसोः सम्प्रसारणम्' (६.४.१३१) इत्यतः 'सम्प्रसारणम्' इति अनुवर्तते । 'अल्लोपोऽनः' (६.४.१३४) इति अग्रिमसूत्रात् 'अनः' इति अपकृष्यते ।
- अन्नन्तानां भसंज्ञकानाम् एषाम् अतद्धिते परे सम्प्रसारणं स्यात् ।

- मघवन्  अस्
- मघ उ अन्  अस् (‘श्वयुवमघोनामतद्धिते’ इति वस्य सम्प्रसारणेन उकारः)
- मघ उन्    अस्   (‘सम्प्रसारणाच्च’ - ६.१.१०८ - इति पूर्वरूपम्)
- मघोनस्      (‘आद्गुणः’ - ६.१.८७)
- मघोनः       (रुत्व-विसर्गौ)

- मघोना, मघवभ्याम् इत्यादि ।

- अन्नन्तानां किम्?
- मघवतः, मघवता ।
- तृ-आदेशपक्षे सम्प्रसारणं न ।
- स्त्रियां मघवती ।

- अतद्धिते किम्?
- माघवनम् ।
- 'साऽस्य देवता' इति मघवन्-शब्दाद् अणि आदिवृद्धिः । अत्र भसंज्ञायां सत्यामपि तद्धितत्वात् संप्रसारणं न ।

# नकारान्तः पुंलिङ्गः मघवन्-शब्दः (तृत्वाभावे)

सुटि राजवद्रूपाणि

| | एकवचनम् | | बहुवचनम् |
|---|---|---|---|
| प्रथमाविभक्तिः | मघवा | मघवानौ | मघवानः |
| सम्बोधनप्रथमाविभक्तिः | हे मघवन् | हे मघवानौ | हे मघवानः |
| दवितीयाविभक्तिः | मघवानम् | मघवानौ | मघोनः |
| | मघोना | मघवभ्याम् | मघवभिः |
| | मघोने | मघवभ्याम् | मघवभ्यः |
| | मघोनः | मघवभ्याम् | मघवभ्यः |
| | मघोनः | मघोनोः | मघोनाम् |
| सप्तमीविभक्तिः | मघोनि | मघोनोः | मघवस |

शस्प्रभृतिषु अजादिषु सम्प्रसारणम्

शस्प्रभृतिषु हलादिषु नलोपः

- नकारान्तः पुंलिङ्गः श्वन्-शब्दः ।
- सुटि राजवत् ।
- श्वा, श्वानौ, श्वानः इत्यादि ।

- श्वन्  (शस्) अस्
- श्  उ अन्   अस्  ('श्वयुवमघोनामतद्धिते' - ६.४.१३३ - इति सम्प्रसारणम्)
- शुन् अस्      ('सम्प्रसारणाच्च' - ६.१.१०८ - इति पूर्वरूपम्)
- शुनः (रुत्व-विसर्गौ)

- शुना, श्वभ्याम् इत्यादि

# नकारान्तः पुंलिङ्गः श्वन्-शब्दः

**सुटि राजवद्रूपाणि**

| | एकवचनम् | | बहुवचनम् |
|---|---|---|---|
| प्रथमाविभक्तिः | श्वा | श्वानौ | श्वानः |
| सम्बोधनप्रथमाविभक्तिः | हे श्वन् | हे श्वानौ | हे श्वानः |
| द्वितीयाविभक्तिः | श्वानम् | श्वानौ | शुनः |
| | शुना | श्वभ्याम् | श्वभिः |
| | शुने | श्वभ्याम् | श्वभ्यः |
| | शुनः | श्वभ्याम् | श्वभ्यः |
| | शुनः | शुनोः | शुनाम् |
| सप्तमीविभक्तिः | शुनि | शुनोः | श्वस |

**शस्प्रभृतिषु अजादिषु सम्प्रसारणम्**

**शस्प्रभृतिषु हलादिषु नलोपः**

- नकारान्तः पुंलिङ्गः ‘युवन्’ शब्दः ।
- सुटि राजवद्रूपाणि ।

- युवन्-शब्दे वस्य उत्वे कृते,
- युवन् (शस्) अस्
- यु उ अन्   अस्   (‘श्वयुवमघोनामतद्धिते’ - ६.४.१३३ - इति सम्प्रसारणम्)
- यु उन् अस्   (‘सम्प्रसारणाच्च’ - ६.१.१०८ - इति पूर्वरूपम्)
  - पुनः यकारस्यापि सम्प्रसारणे प्राप्ते,

# ३६३. न सम्प्रसारणे सम्प्रसारणम् (६.१.३७)

- पदत्रयम् । न, सम्प्रसारणे, सम्प्रसारणम् ।
- सम्प्रसारणे परतः पूर्वस्य यणः सम्प्रसारणं न स्यात् ।
- इति यकारास्य न इत्वम् ।
- अत एव ज्ञापकाद् अन्त्यस्य यणः पूर्वं सम्प्रसारणम् ।

- यु उन् अस्
- यूनस् (‘अकः सवर्णे दीर्घः’ - ६.१.१०१)
- यूनः (रुत्व-विसर्गौ)
- यूना, युवभ्याम् इत्यादि ।

# नकारान्तः पुंलिङ्गः युवन्-शब्दः

सुटि राजवद्रूपाणि

| | एकवचनम् | | बहुवचनम् |
|---|---|---|---|
| प्रथमाविभक्तिः | युवा | युवानौ | युवानः |
| सम्बोधनप्रथमाविभक्तिः | हे युवन् | हे युवानौ | हे युवानः |
| द्वितीयाविभक्तिः | युवानम् | युवानौ | यूनः |
| | यूना | युवभ्याम् | युवभिः |
| | यूने | युवभ्याम् | युवभ्यः |
| | यूनः | युवभ्याम् | युवभ्यः |
| | यूनः | यूनोः | यूनाम् |
| सप्तमीविभक्तिः | यूनि | यनोः | यवस |

शस्प्रभृतिषु अजादिषु सम्प्रसारणम्

शस्प्रभृतिषु हलादिषु नलोपः